Shri Raghunath Temple MSS. Library,
JAMMU

No. १३०४

Title निर्विकल्प विचार:

Author ×

Extent २ Age ×

Subject न्यायवैशेषिकं

निर्विकल्पविचारः

१३०४

एवं श्रिन

निर्विकल्पविचार पत्र २

निर्वि०वा०

१

ॐ श्रीगणेशाय नमः ॥ ननु निर्विकल्पकज्ञाने स्य[illegible]प्रत्यक्ष[illegible]तोऽतीन्द्रियत्वाभ्युपगमः ॥ विनिगमनाविरहेणानि
ष्प्रकारकज्ञानत्वं निर्विशेषणकज्ञानत्वं निःसंस[illegible]र्गकज्ञानत्वं [illegible]सिद्धं मैं मानसत्वावच्छिन्नं प्रति प्रतिबन्धकत्रयप
कल्पनामपेक्ष्यतेन्द्रियकल्पनाभ्युपगमस्यैव युक्तत्वात् ॥ ननु निर्विकल्पकस्येन्द्रियकत्वे तदनुव्यवसायापत्तिरिति
वाच्यम् ॥ यत्रादौ निर्विकल्पकं ततो विशिष्टबुद्धिस्तत्र विशिष्टबुद्ध्यनुव्यवसाये [illegible]काले निर्विकल्पक
स्याप्यनुव्यवसाये इष्टापत्तेः ॥ तत्र घटं साक्षात्करोमीत्याद्यनुव्यवसाये निर्विकल्पकस्य विषयत्वाभावस्य
प्रामाण्यनिर्णायकत्वात् ॥ नन्वेवमपि यत्र विनश्यदवस्थेन्द्रियसंनिकर्षजन्यं निर्विकल्पकं ततो विशिष्टप्रत्यय
स्तत्रापि निर्विकल्पकस्याप्यनुव्यवसायापत्तिर्दुर्वारेति वाच्यम् ॥ विषयविशिष्टविषयकज्ञानादिप्रत्य
क्षस्यालौकिकत्वमात्राविषयमानसामग्रीविरहादेव निर्विकल्पकस्याप्यनुव्यवसायानुदयात् ॥ किं चानि

विकल्पकस्याप्रत्यासत्तितया विषयभासकसामग्रीविरहाद्धि नष्टघटत्वस्य संनिकर्षजन्यनिर्विकल्पके भाना
भावाच्च ॥ न चैतथापि घटत्वादिनिर्विकल्पकानन्तरं घटत्वा[illegible]त्वादिसमवेतप्रत्यक्षोत्पत्तिप्रसंगेन
घटत्वादिनिर्विकल्पकस्य समवायाद्याकारापत्तिः विषयभासकत्वे । कैकसन्निकर्षादिति वाच्यम् ॥ इष्टत्वात् ॥
दोषविलोपस्यापाद्यानिर्देश्यत्वात् ॥ घटरूपचैत्रादिज्ञानजनकज्ञानविषयस्य चैत्र न संयोगादेर्वि
शेषणतया भासमानत्वादेरपि निर्विकल्पकेऽवच्छेदभानेनेष्टाद्दूषघटत्वादेरपि सविकल्पकमा
त्रवेद्यत्वाच्च ॥ किं नष्टघटत्वस्य ज्ञानजन्यघटत्वादेर्भानाभावात् नियमतः । इति त्वन्निर्विकल्पकस्य घटं
विषयकत्वेऽपि कल्पनेनैव तेरपि सविकल्पकमात्रावेद्यत्वात् ॥ विशेषणगुणेऽप्रधाने नैवात्मनो
मानसन्निपातेरस्मनो मिलितत्वाद्वादिति चेन्नैवम् ॥ अयं घट इति आपातमक विशिष्टप्रत्य

निर्वि॰ वा॰
२
2

ज्ञानं तं घटत्वेनेदं साक्षात्करोमीत्येवानुव्यवसायोत्पत्त्या तत्र निर्विकल्पकमानस्यावश्यकत्वात् प्रका
रस्य तृतीयार्थत्वात्॥ विशेषणतामात्रस्य तृतीयार्थत्वे ज्ञानेन घटत्वं साक्षात्करोमि इत्यनुव्यवसायेनेदं सा
क्षात्करोमीत्यनुव्यवसायापत्तेः॥ न च एवं मानसत्वावच्छिन्नांशेऽपि निर्गमना विरहात् निष्प्रकारकज्ञानं ल
द्विना प्रतिबध्यप्रतिबन्धकभावकल्पनाविना दोषाय प्रामाणिकत्वात्॥ अनुपादेयत्वादेरप्यतीं
द्रियत्वविलोपाच्चेति दिक्॥ इति श्रीमहामहोपाध्यायविरचितं निर्विकल्पविचाररहस्यं समाप्तम्॥ प्र
गात्॥ संवत १९१८॥ मि॰ श्री॰ श्री॰॥ २